योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः ०६

षष्ठः सर्गः ६

श्रीवसिष्ठ उवाच ।

अथ तां मनसा ध्यायंस्तत्रैवामीलितेक्षणः ।

आरब्धवान्मनोराज्यमिदमेकः किलोशना ।। १

एषा हि ललना व्योम्नि सहस्रनयनालये ।

संप्राप्तोऽयमहं स्वर्गमालोलसुरसुन्दरम् ।। २

इमे ते मृदुमन्दारकुसुमोत्तंससुन्दराः ।

द्रवत्कनकनिष्यन्दविलासिवपुषः सुराः ।। ३

इमास्ता लोचनोल्लासदृष्टनीलाब्जदृष्टयः ।

मुग्धहासविलासिन्यः कान्ता हरिणदृष्टयः ।। ४

इमे ते कौसुमोद्योता अन्योन्यप्रतिबिम्बिताः ।

विश्वरूपोपमाकारा मरुतो मत्तकाशिनः ।। ५५

ऐरावणकटामोदविरक्तमधुपश्रुताः ।

इमास्ताः काकलीगीता गीर्वाणगणगीतयः ।। ६

इयं सा कनकाम्भोजचलद्वैरिञ्चसारसा ।

मन्दाकिनीतटोद्यानविश्रान्तसुरनायका ।। ७

एते ते यमचन्द्रेन्द्रसूर्यानलजलानिलाः ।

लोकपालास्तनुद्योतकीर्णदीप्तानलार्चिषः ।। ८

अयं स रणवृत्तान्तहेतिकण्डूयिताननः ।

ऐरावणो रणे दन्तप्रोतदैत्येन्द्रमण्डलः ।। ९

इमे ते भूतलस्थानाद्व्योम्नि तारकतां गताः ।

वैमानिकाश्चरच्चारुचामीकरमयातपाः ।। १०

मेरूषलतलास्फालसीकराकीर्णदेवताः ।

एतास्ताः कीर्णमन्दारा गङ्गासलिलवीचयः।। ११

एताः प्रसृतमन्दारमञ्जरीपुञ्जपिञ्जराः ।

दोलालोलाप्सरःश्रेण्यः शक्रोपवनवीथयः ।। १२

इमे ते कुन्दमन्दारमकरन्दसुगन्धयः ।

चन्द्रांशुनिकराकाराः पारिजातसमीरणाः ।। १३

पुष्पकेसरनीहारपटवासरणोत्सुकैः ।

लताङ्गनागणैर्व्याप्तमिदं तन्नन्दनं वनम् ।। १४

कान्तगीतरवानन्दप्रनर्तितसुराङ्गनौ ।

इमौ तौ वल्लकीस्निग्धस्वरौ नारदतुम्बुरू ।। १५

इमे ते पुण्यकर्तारो भूरिभूषणभूषिताः ।

व्योमन्युड्डीयमानेषु विमानेषु च संस्थिताः ।। १६

मदमन्मथमत्ताङ्ग्य इमास्ताः सुरयोषितः ।

देवेश्वरं निषेवन्ते वनं वनलता इव ।। १७

इन्द्राश्मजालकुसुमाश्चिन्तामणिगुलुच्छकाः ।

कल्पवृक्षा इमे पक्वफलस्तबकदन्तुराः ।। १८

इह तावदिमं शक्रमहमासनसंस्थितम् ।

द्वितीयमिव त्रैलोक्यस्रष्टारमभिवादये ।। १९

इति संचिन्त्य शुक्रेण मनसैव शचीपतिः ।

तेनाभिवादितस्तत्र द्वितीय इव खे भृगुः ।। २०

अथ सादरमुत्थाय शुक्रः शक्रेण पूजितः ।

गृहीतहस्त आनीय समीपमुपवेशितः ।। २१

धन्यस्त्वदागमे नाथ स्वर्गोऽयं शुक्र शोभते ।

उष्यतां चिरमेवेह शक्र इत्थमुवाच तम् ।। २२

अथ तत्रोपविश्यासौ भार्गवः शोभिताननः ।

श्रियं जहार शशिनः सकलस्यामलस्य च ।। २३

सकलसुरगणाभिवन्दितोऽसौ

भृगुतनयः शतमन्युपार्श्वसंस्थः ।

चिरतरमतुलामवाप तुष्टिं

नरपतिसत्तमलालनं बभूव ।। २४

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० मो० स्थितिप्रकरणे भार्गवोपाख्याने भार्गवमनोराज्यं नाम षष्ठः सर्गः ।। ६ ।।